This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीगणेशाय नमः॥ वाक्सारतीरसरसीरुहसादधानः शुभ्रश्चकास्तु हृदयेमधुमेदुबिंबं।
हेमाम्बुराशिरतरंभवनःसपायात्सजातनिर्मज्जकप्रतिबद्धनमः॥१॥ अभिवंद्यविधि
धोरङ्गधारिणं चकणवृतं॥ प्रमाणमंजरीसर्वदेवेनक्रियतेमया॥२॥ अभिधेयःपदा
र्थः॥ सभावाभावभेदाद्विधा॥ पदार्थविधिनिषयः॥ सषोढाद्रव्यादिभेदेन॥ तत्रस (५)
मवायीकारणंद्रव्यं॥ तन्नवधापृथिव्यादिभेदेन॥ तत्रगंधवतीपृथिवी॥
साद्वेधानित्यानित्यभेदेन॥ पर्वापरमाणुरूपा॥ क्रियावान्नित्यःपरमाणुरिति
सामान्यलक्षणं॥ परमाणुर्गंधवान्नपार्थिवपरमाणुः॥ उत्तराद्वेधानित्यसमवेता
न्यथाचेति॥ द्व्यणुकंत्रिधा॥ स्यात्रयाणांनित्यसमवेतंद्व्यणुकमितिसामान्यलक्ष
णं॥ गंधवद्द्व्यणुकंपार्थिवद्व्यणुकं॥ पृथिवीत्वंनित्यसमवेतत्वंघटपट्टा

KKSU LIBRARY
RAMTEK
441 106
M-1504
Dist Nagpur

Acc NO. ~~4295~~ M-1504
Title - प्रमाणमञ्जरी.
Author - सर्वदेव (तार्किकचक्रचूडामणि)
Date - ?
Subject - न्याय.
folio - 17
Xerox - 32

Checked 2012

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नित्यात्सत्तावदिति परमाणुद्व्यणुकयोसिद्धिः॥ उत्तरत्रेधाशरीरादिभेदेन॥ स्पर्शवदिंद्रिय
रसयुक्तमेव भोगसाधनंशरीरमिति सामान्यलक्षणं॥ गंधवच्छरीरंपार्थिवंशरीरं॥
स्वसमवेतसुखदुःखान्यतरसाक्षात्कारोभोगः॥ तद्द्वेधायोनिजायोनिजभेदेन॥
पूर्वमस्मदादीनांप्रत्यक्षसिद्धं॥ उत्तरंद्वेधा॥ पद्मधर्मजं न्यथाचेति॥ पार्थिवाः
परमाणवः पारंपर्येणकदाचित्पद्मधर्मजायोनिजशरीरारंभकाः॥ स्पर्शवत्परम
माणुत्वात्॥ उदकपरमाणवइति अयोनिजशरीरसिद्धिः॥ दुग्धभूयस्त्वाद्धर्मज
मुत्तरमृषयादीनांप्रत्यक्षसिद्धं तस्यायोनिजत्वं॥ घ्राणमप्रत्यक्षं साक्षात्कारप्रती
तिसाधनमिंद्रियमिति सामान्यलक्षणं॥ गंधवदिंद्रियंघ्राणं॥ तत्रप्रमाणं॥ पार्थि
वाःपरमाणवः पारंपर्येणेंद्रियारंभकाः स्पर्शवत्परमाणुत्वात्तेजःपरमाणवइति॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्पर्शवान् त्वरादिद्रियव्यतिरिक्तः कार्यजातो विशेषगुणवत्ति सामान्यलक्षणं॥ गंधवाच्चिषयः
पार्थिवो विषयः॥ इष्टकादिरत्यक्षसिद्धः॥ सा चतुर्दशगुणवती॥ एवमुत्तरत्र सामान्यलक्षणं
लक्षयित्वोपदांतरानुगमेनोत्तरसमान्यादीनां लक्षणानि भवंति॥ स्नेहवदंभः॥ तद्द्विविधं॥ नित्यमनित्यं च॥ तत्र परमाणुः॥ उत्तरं च दे द्रव्ये नित्यसमवेतमन्यथा चेति॥ तत्र द्व्यणुकं
मनित्यसमवेतमुत्पत्तिस्थितिप्रलयवच्चेति परमाणु द्व्यणुकयोः सिद्धिः॥ ॥२
उत्तरं चतुर्विंशतिभेदेनत्रेधा॥ त्रादौ रत्नमाणवः॥ अथ परमाणवः पारंपर्येणकदाचित्त्रा
रीरारंभकाः स्पर्शवत्त्वात्पृथिवी परमाणुवदिति॥ तच्चभुक्तत्रोलितसन्नि
धानमपेक्षमाणमपिकार्यमारभत्वादिति॥ तत्रयत्षाहरजंयोनि जत्रारीरत्वात्
मत्राकादिवदिति॥ सुस्वभुयस्त्वान्नाधर्मजं॥ इंद्रियरसनंघ्राणं॥ पृथिव्यादि परमाणवः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्पर्शोवान्त्शरीरेंद्रियव्यतिरिक्तःकार्यजातोविशेषगुणवत्त्वेसतिसामान्यलक्षणं॥ गंधवान्विषयः
पार्थिवोविषयः॥ इष्टकादिप्रत्यक्षसिद्धेः॥ सान्वयव्यतिरेकानुविधायित्वात्॥ एवमुत्तरत्रसामान्यलक्षणं
यत्रयत्रोपादानानुगमेनोत्तरोत्तरसमाप्यादीनांलक्षणानि भवंति॥ स्नेहवद्भ्यः॥ तद्द्विवि
धं॥ नित्यमनित्यंच॥ तत्रपरमाणुःउत्तरंचदेशंनित्यसमवेतमन्यथाचेति॥ तत्रद्व्यणु
कंअन्यंनित्यसमवेतंप्राप्तिसंसर्गजानित्वासतावयवीतिपरमाणुद्व्यणुकयोःसिद्धि॥ ॥२
उत्तरत्रारंभकभेदेनत्रैधा॥ शरीरेप्रमाणंआपःपरमाणवःपारंपर्येणकदाचित्त्रा
रीरारंभकाःस्पर्शवत्सरमाणुत्वात्पृथिवीपरमाणुवदिति॥ तच्चभुक्तक्लोणितस्मि
न्नानिरपेक्षंनाप्यकार्यत्वात्करकवदिति॥ तत्रयत्राहरजंअयोनि जंशरीरंतत्र
मत्राकादिवदिति॥ सुरभ्युपयस्त्वान्नाधर्मजं॥ इंद्रियरसनंआपः॥ परमाणवः



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पारंपर्येणेंद्रियारंभकाः स्पर्शवत्परमाणुश्चानेजःपरमाणुवदिति तत्रप्रमाणं॥ उत्तरो
विषयःसरिदादिःरूपादिचतुर्देशगुणवत्॥ अगुतश्चेसति रूपवत्तेजः। तन्नित्यानि
त्यभेदेनद्वेधा॥ आद्यंपरमाणुःउत्तरंद्वेधानित्यानित्येसमवायात्आद्यंद्व्यणुकं॥
तेजस्त्वंनित्यसमवेतत्वंदीपस्यवर्णोजातिश्चासत्तावदितिपरमाणुद्व्यणुकयोसि
द्धिः॥ नासिद्धंसाधनं॥ तेजस्त्वंसुवर्णेत्वंदीपाणुजातिश्चासत्तावदितिसाधनात्
उत्तरंशरीरादिभेदेनत्रेधा॥ सर्वत्रप्रमाणं॥ तैजसाःपरमाणवःपारंपर्येणशरीरा
रंभकाःस्पर्शवत्परमाणुश्चात्रपृथिवीपरमाणुवदिति॥ तदयोनिजमेवतेजःकार्य
त्वात्दीपवत्॥ नयनास्यंतैजसेंद्रियंतत्रप्रमाणं॥ आलोकासंताभावेजायमा नो
पलब्धाउपलब्धेःकारणकःउपलब्धात्वात्सत्तालोकोजायमानरूपसा



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्षात्कारवत्त्वात्॥ तद्योलक्ष्यं॥ नयानोन्मीलने सत्येवोपलब्धेः॥ आलोकाज्ञानं तम
इत्यभ्रांतसिद्धिरिति चेत्॥ नाधिगमुरवे नस्यात्तंत्रेण कृष्णाकारेण बाह्यरूपतयावृतौ
तेः॥ अतएवनालोकाभावः॥ आलोकाभाव स्तमइतिवदतोपिभ्रांते॥ आरोपितनील
रूपप्रतीतेः सत्यानाश्रयासिद्धिः॥ तमेनभावरूपंअसत्येवालोके चक्षुषाप्रतीयमा
नत्वात्॥ आलोकाभाववदिति प्रमाणोपपत्तेः॥ कृष्णरूपंतमोद्रव्यमितिवदतोभ्रांते
रूपप्रतीतेश्च सत्यानाश्रयासिद्धिः॥ तदतिरिक्तोविषयो भोगादिः॥ रूपाद्येकादशगु
णवत्॥ रूपासहचरितस्पर्शवत्त्वाद्वायुः॥ सनित्यानित्यभेदभिन्नः॥ तत्रनित्यः परमाणुः॥
उभयोद्वेधा॥ नित्यसमवेतोन्यथाचेति॥ आद्यो द्व्यणुकं॥ वायुर्नित्यसमवे
तस्पर्शवत्त्वेद्रव्यत्वाद्वायुरजातिः स्यात्पृथिवीत्वादिनापरमाणुश्च



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

णुद्वयोः सिद्धिः॥ उत्तरः शरीरादिभेदेन त्रैविध्यमभिधत्ते॥ वायुपरमाणवः पारंपर्येणत्रीणि शरीरमकाः स्पर्शवत्परमाणुत्वात्तेजःपरमाणुवदिति॥ शरीरसिद्धिः। तदयोनिजं वायुकायेत्वक्चक्षुरिन्द्रियवत्॥ वायुपरमाणवः पारंपर्येणद्वियारंभकाः स्पर्शवत्परमाणुत्वात्तेजःपरमाणुवदिति॥ इन्द्रियसिद्धिः॥ तदन्योविषयः॥ त्वगिन्द्रियंअतएवद्रव्यग्राह्यं अरूपित्वेसतिद्रव्यग्राह्येंद्रियत्वात्मनोवदिति॥ वायोरप्रत्यक्षत्वसिद्धिरितिचेत्॥ नात्मतत्वेसतिसदास्पर्शवत्त्वस्योपाधित्वात्॥ विप्रतिपन्नोवायुरप्रत्यक्षः। वायुत्वात्त्वगिन्द्रियवत्॥४॥ स्पर्शादिनवगुणवान्॥ शब्दवदाकाशं तत्रप्रमाणं॥ शब्दोऽष्टद्रव्यव्यतिरिक्तसमवेतसत्वेसति श्रोत्रग्राह्यत्वात्॥ शब्दवदिति॥ विप्रतिपन्नाः शब्दाः श्रूयमाणत्वाद्याश्रयाश्रयाः शब्दास्तत्श्रूयमाणशब्दवदिन्द्रिये

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कत्वसिद्ध॥ आकाशं नित्यं असमवेतभावत्वात् समवायवत्॥ इतिनित्यत्वंसिद्धं॥ तदेवं
द्रियंश्रोत्रंनाम। शब्दोपलब्धिकर्तेन्द्रियं कुण्डिका रूपशब्दयोरन्यतरसाक्षात्का
रत्वात् रूपसाक्षात्कारवदितिपारिशेष्यात्सिद्धं॥ परिशेषस्तुविप्रतिपन्नाः शरीरेत
द्रव्यवानयनादयः तद्ग्राहकानपलब्धेति। कार्यत्वात्घटवदिति॥ नकालादयस्त
ग्राहकाः अजसंयोगनिराकरणात्। शब्दादिषड्गुणवं विवक्षितपरत्वासमवायाा
श्रयमवेसति सर्वगतत्वाव विप्रतिपन्नंमनो विवक्षितंपरत्वासमवायाश्रयस
युक्तद्रव्यत्वादात्मवदिति। तत्रमनाः। अनियतपरत्वासमवायाश्रयवेसति सर्व
गतादिवे॥ विप्रतिपन्नंमनोऽनियतपरत्वासमवायाश्रयवेसंयुक्तद्रव्यत्वादात्मव
दिति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दिनित्रयप्रमाणं॥ मनसासंयुक्तंमन सर्वदाविशेषगुणरहितद्रव्यद्वयसंयुक्तंद्रव्यत्वा
दात्मवदितिहेत्वाश्रयो प्रमाणं॥ अद्रव्यद्वितयेकल्पिते न्यत्रतेनैव व्यवहारसिद्धे
रनंतकल्पनायाप्रमाणाभावः। दिक्कालौद्रव्यत्वावांतरजातिरहितौबुध्यनाधरत्वे
सतिसर्वगतत्वादाकाशवदित्येवत्वरसिद्धं॥ विप्रतिपन्नंसर्वकार्यं दिक्कालौ का
र्यकार्यत्वादसंप्रतिपन्नवदितिनयो सर्वकार्यनिमित्तत्वं॥ आकाशकालदिग्
सर्वगतामनोव्यतिरिक्तचेतसस्पर्शद्रव्यत्वादात्मवदितिसर्वगतत्वं॥ सं
ख्यादिपंचगुणवत्त्वकालदिगात्मनोः॥ बुध्यात्रयकात्मा॥ सद्देधा॥ इत्यानीक्षभेदा
त्र॥ पंचप्रमाणं॥ असत्तानित्यविशेषगुणवत्त्वेसतिद्रव्यत्वान्नजातित्वात्र सत्ता



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वदिति॥ ज्ञानंनित्यं॥अनंतकार्यहेतुत्वात्कालवदिति॥तत्तज्ज्ञानंनित्यं।
विप्रतिपन्नंसर्वंकार्यमेवावधितज्ञानजंकार्यत्वात्संप्रतिपन्नकार्यवदित्यनेनहेतु
र्यसिद्धंतस्य।तत्ज्ञानंस्वाश्रयव्यापिनित्यगुणत्वात्परमाणुगुरुत्ववदित्या
श्रयव्यापित्वंज्ञानस्यसिद्धं।अतएवतदिच्छाप्रयत्नावाश्रयव्यापिनौ॥ ॥५॥
तराचप्रमाणं॥भोगःक्वचिदाश्रितःगुणत्वाद्रूपवदिति॥नकार्याणिनद्वंति॥का
र्यत्वात्पटवदिति॥नश्वोत्पादिनोनद्वंति॥करणात्वाद्दंडवदिति॥भोगोगुणः॥अनित्ये
सत्यशुष्यत्यक्षत्वाद्धवदितिहेतुसिद्धिः॥असमदाद्यात्मद्रव्यत्वात्तर
जातित्वान्नचतुर्दशगुणवत्त्वात्साधोवदिति॥आत्मत्रयोनेकवाचकः॥आत्म

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वाचकत्वासदृश्यादिति नानात्वं॥ सशरीरेतराणि मूर्तानि मदात्मसंयुक्तिमूर्तत्वा
न्मशरीरवदिति सर्वगतत्वं तस्य॥ इतोऽपि सर्वगतः आत्मत्वाद्देहवदिति। सनित्यः
सर्वगतत्वात्। काल वत्॥ सबुध्यादिचतुर्दशगुणयात्॥ मूर्तेष्वेसति सर्वदा
स्पर्शाभ्यन्यमनः। सुखज्ञानमिंद्रियजं चनित्यज्ञानत्वा द्रूपज्ञानवदिति तच्चमाणं॥
मनोगुणआत्मसंयोगित्वेसति निरवयवत्वात्परमाणुवदिति मूर्तेष्वंतस्थसिद्धं॥
अजसंयोगनिराकरणात्तन्नसर्वगतेनव्यभिचारः। संख्यादयेगुणा॥ इतिनाधिक
रचनचडामणिसर्वदेवसूरिभिरचितायां प्रमाणमंजर्यां द्रव्यपदार्थः॥
कर्मान्यत्सति सामान्यैकाश्रयोगुणः सरूपादिभेदेन चतुर्विंशतिधा। नयनै
कग्राह्यसजातिमत्तद्रूपं॥ २ रसनैकग्राह्यसमानरसः॥ ३ घ्राणैकग्राह्यजाति



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मारगंध॥ [illegible]रोनैकगुणसजातिमान्स्पर्शो॥ एतेषांव द्रव्यभाव्यावद्रव्यभा
विभेदद्वैधा॥ पार्थिवपरमाणोरन्यत्रयावद्द्रव्यभाविनः॥ प्रत्यक्षद्रव्येप्रत्य
क्षतस्तथासिद्धः॥ द्व्यणुकादिषुयावद्द्रव्यभाविनोः॥ सलिलादितत्पादित्यासंप्र
तिपन्नवदिति॥ पार्थिवपरमाणुषुअयावद्द्रव्यभाविनः॥ कार्यरूपादित्यासट
रूपादिवदिति॥ सलिलादिपरमाणुरूपादयोयावद्द्रव्यभाविनः॥ ×॥ तत्रप्र
माणं॥ पार्थिवपरमाणोसतिरूपादयोनिवर्तनेअनित्यत्वासंप्रतिपन्नयदिति॥
पार्थिवंद्व्यणुकं॥ अनित्यविशेषगुणवत्त्वात्तत्तथेतिपार्थिवकार्यत्वोत्पटव
दितिनासिद्धसाधनं॥ तत्वतनिबद्धलीढेमहीखंडेपूर्वेरूपविलक्षण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रूपादिभ्यस्तद्वत्। दर्शनात्। नत्वेवंकल्पनेनातिप्रसंगः॥ तत्र पार्थिवपरमाणुरग्नि
संयोगासमवायिकारणविशेषगुणवान् नित्यविशेषगुणवत्त्वेसतिनित्यद्रव्य
त्वादाकाशवदिति॥ पाकजत्वंतेषांसिद्धं॥ गुणत्वाद्व्यणुकपरिमाणा
समवायिकारणसजातियासंख्या॥ साद्वेधा॥ अयावद्द्रव्यभावियावद्द्रव्यभावि
भेदात्॥ एवंत्रयमाणं॥ परिमाणत्वं संयोगातिरिक्तानेकद्रव्यासमवायिकारण
वति॥ परिमाणजातियोगात्तथात्वमिति॥ परमाणुपरिमाणमसमवायिकारणं न
भवति॥ नित्यपरिमाणत्वादाकाशपरिमाणवदिति॥ परपदार्थव्युदासः॥ द्वित्व
मयावद्द्रव्यभाव्यनेकगुणत्वात्संयोगवत्॥ द्वित्वसामान्यबुद्धिजन्यत्वाद्द्वित्व
जातियोगात्तथात्वमिति बुद्धिजन्यं॥ उत्तरत्र प्रमाणं॥ संख्यैकत्वंयावद्द्रव्यभावि



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वमि॥ दित्यजातित्वात्सत्तावदिति॥ तदेवैकत्वं स[illegible]णः सामान्येकाश्रय
त्वेसतिअवा[illegible]द्रूपवदिति॥ परपक्षव्युदासः॥ एवंभूतायाः संख्यायाः पदार्थांत
रत्वेस्वीकृतेरूपमेपिपदार्थांतरंभवेत्॥ गुणत्वावांतरजातिसाधर्म्यात्कार्य्याप्रस
क्तामगत्यायावद्द्रव्यभावित्सजातीयपरिमाणं॥ आत्माएथक्त्वाप्रसक्तयाच
द्रव्यभाविगुणवान्सर्वगतत्वाद्विभुत्वात्॥ सर्वद्रव्यपरिमाणाधिकारणं द्र
व्यत्वादात्मवदिति॥ नचतुर्विधं॥ त्रैएणुहृदीर्घहस्यभेदात्॥ द्व्यणुकेअणु
त्वमंगीकृत्यहस्वत्वंनिराकुर्वाणंप्रतीदमनुमानं॥ द्व्यणुकमणुपरिमाणाति
रिक्तपरिमाणाधिकरणंकार्यद्रव्यत्वान्नटवदिति॥ घटेमहत्त्वमंगीकृत्य॥ दी
र्घत्वमंगीकुर्वाणंप्रतीदमनुमानं॥ घटोमहत्त्वव्यतिरिक्तपरिमाणाधिकर

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ण॥कार्यद्रव्यत्वाद्द्व्यणुकवदिति॥॥संख्यातिरिक्तादेकाकगताभ्यंतरं सजातीय
एथक्त्वं तत्त्रेधा॥यावद्द्रव्यभाव्ययावद्द्रव्यभावि भेदात्॥कालःसंख्यातिरि
क्तदिगात्मगुणवान्द्रव्यत्वात्घटवदिति॥यावत्द्रव्यभावि एथक्त्वविधिः
एथक्त्वसामान्यमस्मदादिबुद्धिजन्यं एथक्त्वजातित्वात्सत्तावदिति बुद्धिल
क्षणसिद्धं॥तत्सामान्यकारणगुणत्वेपि एथक्त्वजातित्वात्सत्तावदिति॥तत्सामा
न्यंयावद्द्रव्यभावि एथक्त्वजातित्वात्सत्तावदिति एकएथक्त्वसिद्धिः॥॥गुणत्वा
दांतरङ्गाद्द्रव्यसमवायिकारणसजातीयःसंयोगः तत्प्रमाणं॥संयोगपदसत्
वाच्यं॥क्रियत्वात्स्पर्शवद्वैशेषिकपदवदिति॥परिशेषात्॥सन्निधिर्योन्यतरकर्मजो
भयकर्मजः संयोगजश्चेत्रात्॥तत्रोभयप्रसिद्धं॥२॥ येयप्रमाणं॥संयोगात्

२ स्व



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संयोगासम [illegible] यिकारणवृत्तिसंयोगसमवेतत्वात्सत्ता [illegible] विप्रतिपन्नाः आत्मा
दयः आव [illegible] न संयुज्यते सर्वगतत्वादाकाशवदिति। अजसंयोगनिरासः।
अथ। द्रव्यभावित्वं तस्यत्रसक्षसिद्धं।। संयोगविरोधीगुणोविभागः। तत्र
प्रमाणं। आकाशः संयोगातिरिक्तमेजगुणाधारः द्रव्यत्वाच्छरीरवदिति। वि
प्रतिपन्नं सर्वद्रव्यं। विभागवत्द्रव्यत्वादाकाशवदिति। सद्विधाकर्मजविभाग
जभेदात्। आद्योद्विधा। अन्यतरकर्मजोभयकर्मजभेदात्। तत्रप्रमाणं।
विभागत्वमेकानेककर्मसमवायिकारणवृत्ति। विभागजातित्वात्संभावदि
ति। विभागजविभागसिद्धिः परिशेषात्। विभागत्वं विभागासमवायिक
रणवृत्तिविभागजातित्वात्सत्तावदिति। वानुमानं। परव्यवहारेयाद्दृशेष

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

णत्वान्नित्यं तत्सदृशं। अपरं व्यवहारे यद्विशेषणत्वान्नित्यं तत्तदपरं।
तच्चप्रमाणं। घटोऽस्मदादिबुद्धिजैकद्रव्यजातीयवात्। अनेकविशेषगुणसम
वायिकारणत्वादात्मवदिति। विप्रतिपन्नपरत्वादिसंयोगासमवायिका
रणकं अस्मदादिबुद्धिजैकद्रव्यत्वात्सुखवत्। परिशेषाद्विशेषेऽपि
उसंयोगासमवायिकारणत्वं सिद्धमनयोः। अर्थावग्रहेबुद्धिः। सा
द्विधा नित्यानित्यभेदात्। [illegible] चर्णभगवद्दत्ता तोमहेश्वरस्य।
सापरीक्षितात्मचक्षुरादेरुत्तरापि नीत्यानात्मसमवेतसिद्धा।
साद्विधा [illegible] विद्याविद्याभेदात्। बाधीताधीः [illegible] विद्या। साद्विधा नि



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अयानि[illegible]भेदात्॥ तत्प्रमा॥ [illegible]यिवादपदरजतधी
पदज्ञानसुख्यतिविषयत्वात्सम्यग्रजतवदिति॥ उत्तरःसंशयः॥ इदम
लौस्यनेवमितिव्यवहारोव्यवहार्यज्ञानपूर्वकः॥ व्यवहारत्वात्सम्प्रति
पन्नवदिति॥ तत्प्रमाणं॥ अन्यथ्यवसायस्योहांतर्भावः॥ स्मृतस्यविप
र्यये॥ अबाधितार्थविद्या॥ सादेधा॥ प्रमितिरन्यथाचेति॥ सम्यग
नुभूतिःप्रमितिः॥ सादेधा॥ प्रत्यक्षेतराचेति॥ अपरोक्षासाक्षात्प्रत्यक्षं॥ इत
रत्सापरोक्षं॥ पूर्ववत्सादेधा॥ प्रदृष्टधर्मजेतरभेदात्पूर्वयोगिप्रत्य
क्षं॥ तत्प्रमाणं॥ धर्मः यस्यचित्तस्यक्षः प्रमेयत्वादासीवत्॥ यस्य



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सः वयस्सः सयोगी। उत्तरासमदादीनांप्रत्यक्षा। सापिप्रकारांतरेणद्वेधा। स
विकल्पकनिर्विकल्पकभेदात्। विशिष्टविषयंनिर्विकल्पकं। तत्प्रमाणं।
स्मृतिव्यतिरिक्तत्वेसतिअबाधितबुद्धित्वान्निर्विकल्पकप्रमावदिति। वस्तुस्व
रूपमात्रावभासकंनिर्विकल्पकं। ज्ञानांसविकल्पकत्वादृष्टांतासिद्धि
रितिचेत्। तत्रप्रमाणोपपत्तेः। सर्वेविकल्पाःज्ञानव्याप्ताजा
तिमतःजातिमत्वात्पटवदिति। उत्तरालैंगिकी। लिंगंपुनःसाध्यव्यापि च
त्वेसतिपक्षधर्मतायुतं। तद्द्वेधाभिद्यते। अन्वयिव्यतिरेकीभेदात्।
यस्यसाध्येनसाहचर्यनियमस्तदन्वयि। सविपक्षेसतिच। पूर्वमन्वय
व्यतिरे[illegible] यथाग्निनदीनिसः॥ × [illegible]



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रथः तथा नेदंतस्मात्तथा॥ उत्तरकेवलान्वयि॥ यथा॥ स्वात्मव्यापकः कस्यचि
त्प्रत्यक्षः धर्मोयत्वात्॥ यदेवंतदेवंयथापृथिवी॥ तथा चायंतत्तस्मात्तथा॥
अस्तितसपक्षेयस्यसाध्याभावेऽभावनियतस्तद्व्यतिरेकी॥ यथा॥ सर्वंकार्यं
सबुद्धिमत्पूर्वकंकार्यत्वान्नयदेवंनतदेवंयथापरमाणुर्नचनेदंतथातस्मा
न्नतथा॥ लिंगलक्षणरहितालिंगाभिमतानविषयालिंगाभासाः॥ तेचासि
द्धविरुद्धानैकांतिकानध्यवसितकालात्ययापदिष्टप्रकरणसमभेदात्षट्प्र
काराः॥ पक्षधर्मत्वेऽसानोऽसिद्धः॥ यथाशब्दोनित्यःचाक्षुषत्वात्॥ पक्ष
विपक्षयोरेवर्त्तमानोविरुद्धः॥ यथाऽनित्यःशब्दःश्रोत्रग्राह्यत्वात्॥ दिति
पक्षसपक्षनिरनेकांतिकः॥ यथाशब्दोनित्यःप्रमेयत्वादिति॥ सपक्षविपक्ष



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

व्याप्तः पक्षेवर्तमानोऽनध्यवसितः॥ यथा पृथिवी नित्या गंधवत्त्वादिति॥ प्रमाणवि
रोधेनबाधितविषयः कालात्ययापदिष्टः॥ यथाऽनुष्णोऽग्निः प्रमेयत्वादिति॥ समव
स्तुकबुद्धिसाधनहेतुद्वयसमावेशात्सत्प्रतिपक्षः॥ यथा शब्दो नित्यः स्पर्शन्य
त्वादिति॥ नित्यसामान्यवत्वे सतिअस्मदादिबाह्येंद्रियग्राह्यत्वादिति बोध्यं॥
युक्तः॥ दोषप्रत्याख्यानं॥ वाक्यात्प्रकृतार्थधीरसंनिहितविषये अभावधीरनुमि
तेर्जीवतोबहिर्बुद्धिरनुमितिः॥ अस्मद्धेतरप्रमितित्वात्संप्रतिपन्नवत्॥ संनिहितवि
षयाभावप्रमाप्रत्यक्षजाऽनुमित्यन्यप्रमितित्वात्संप्रतिपन्नवदित्यंतर्भावः॥
दोषप्रत्याख्यानं॥ उत्तरासूत्रं॥ साऽप्रमास्वविषयेचप्रत्यक्षानुमानान्यचाधिपत्ये
यथादि॥ ॥इति सिद्धांतविचा॥ ॥यस्मिन्ननुक्तप्रमाणेतत्साधनेघर्मि



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पंगस्य चं॥ यस्मिन्ननुक्तयमाने तत्साधने बुद्धेः स्व॰ ।दुरवं॥ ते बुद्धिजे॥ तद्व्य
यव्यतिरेकानुविधायित्वाद्घटवत्॥ तथा चप्रकृतं तस्मात्तथा॥ कार्थ
राद्धा॥ सद्वेधा नित्यानित्यभेदेन॥ महेश्वरस्यनित्या॥ इतरविशेषगुणत्वात्तद्
बुद्धिवत्॥ विप्रतिपन्नानि कार्याणि इतरेषाञ्जन्यानि कार्यत्वात्संघातिपन्नवदिति॥
सर्वोसन्निमानिमित्तत्वमीश्वरस्या॰ अनित्यानीत्राणां अनित्यविशेषगुणत्वात्
तद्बुद्धिवत्॥ दोषो द्वेषः॥ सोनित्यः जीवविशेषगुणत्वात्तद्बुद्धिवत्॥ बुद्धिज
संतद्व्यतिरेकानुविधायित्वादिति॥ ॥गुणत्वावान्तरजात्या बुद्धिरूपान्ये
श्वरविशेषगुणानसामान्याचारः प्रयत्नः॥ सोस्मदादीनांप्रत्यक्षः ईश्वरस्तु
पुनरयोसिद्धः॥ सनित्यानित्यभेदाद्वेधा॥ नित्यः सर्वस्य॥ नद्विशेषगुणत्वा

॥१५॥

॥ ५ ॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्तबुद्धिर्वदिति।अनियोद्वेधा।इच्छाद्वेषान्यतरपूर्वकश्चेति॥ पूर्वोमानसप्रत्यक्ष
सिद्धः उत्तरोनुमानसिद्धः॥ सुप्तप्राणक्रियासमवायिकारणं संतसजातीयगुणत्वं।तच्चप्राणं।प्रय
त्नजन्यप्राणक्रियात्वदिति।आद्यपतनासमवायिकारणं संतसजातीयगुणत्वं।तच्चप्रयत्नं।प्रय
त्नपतनंजसमवायिकारणपूर्वकक्रियात्वात्संप्रतिपन्नकार्यवदिति।परिशेषात्गुरुत्वसिद्धः।
इतंसर्पिर्यावत्द्रव्यभाव्यतींद्रियवत्। चतुर्दशगुणत्वात्बहुविशेषगुणत्वादनेकवदि
ति।अनुमानद्वयं।तत्राद्यस्यासंभवात्।घटगुरुत्वंयावद्द्रव्यभाविक्रियाजन्य
वेसतिअबुद्धिजन्यत्वेसतिघटसमवेतत्वात्घटरूपवदिति।सर्वेगुरुत्वंयावद्द्र
व्यभावियुतत्वात्घटगुरुत्ववदितिसाधनीयं।अतएवकारणगुणपूर्वकत्वंतत्र
दृष्टांतेनसाधनीयं।घटगुरुत्वमप्रत्यक्षगुणत्वात्परमाणुगुरुत्ववदिति॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

आयस्यंदनाप्यायिकारणात्संतसजातीयंद्रव्यं॥तद्द्व्यानित्यानित्यभेदेन॥सलि
लपरमाणु॥नित्यं॥तत्प्रमाणं॥सलिलद्व्यणुकयावद्द्रव्यभाविद्रव्यत्वसमवे
तंस्वावयविकारणकार्यं॥कार्येचेसतिसलिलत्वात्संज्ञातपन्नसलिलवदिति॥
पार्थिवतेजसपरमाणुद्रव्यमनित्यं॥असलिलद्रव्यत्वात्संप्रतिपन्नवदितीतरसि
द्धिः॥पार्थिवपरमाण्वो रूपादिचतुष्टयवत्तेजोग्निसंयोगजैकद्रव्यारंभयोगि
न॥अग्नित्यविशेषगुणत्वेसतिनित्यपक्षतत्वादाकाशवादिति॥परिशेषात्तेजस
योगजत्वद्रव्यत्वसिद्धं॥तेज॥परमाणुद्रव्यमग्निसंयोगजंउदकानधिकर
णेसतिपरमाणुद्रव्यत्वात्पार्थिवपरमाणुद्रव्यवदिति॥चक्षोपलगतेंद्रियस्य
लघित्वौष्ण्यगुणत्वाद्॥रूपवदिति॥परगतविशेषानपेक्षपार्थिवादिना

गुणत्वंतसजातीयस्नेहः॥स च यावद्द्रव्यभावी लंभोविशेषगुणःसजातीयः



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मन्योन्यव्यवच्छेदकोगुणः विशेषगुणः ॥ गुणत्वाच्चातरङ्गासमवायिकारणः संस्कारः संस्कारः
धावेगादिभेदेन ॥ क्रियासमवायिकारणैकद्रव्यासंतसजातीयोवेगः । दीपत्वंक्रियासमवा
यीकारणैकद्रव्यसमवायिकरणं । स्पर्शवज्जातित्वात्सत्तावदिति वेगसिद्धिः । सदेधावेगज
क्रियाजश्चेति । वेगत्वंवेगासमवायिकारणंवेगजजातित्वात्सत्तावदिति । वेगजसिद्धिः ।
वेगत्वंकर्मासमवायिकारणंवेगजजातित्वात्सत्तावदिति । कर्मजवेगसिद्धिः । यावद्द्रव्य
भाविसंस्कारःस्थितस्थापकः । सुवर्णंयावद्द्रव्यभाव्यतीन्द्रियवेगघनावयव
संयोगाच्चावदितिसिद्धिः । संस्कारः पुरुषगुणोभावनाः । संस्कारत्वंपुरुषगुणत्व
सिद्धिस्थितस्थापकवेगजजातित्वात्सत्तावदिति भावनासिद्धिः । अतीन्द्रियःपुरुषैकदृष्टिः
सुखहेतुश्च अतीन्द्रियपुरुषैकदृष्टिःदुःखहेतुरधर्मः । तत्रप्रमाणं । विमतंस्तनेन्द्रिय



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चलनपुरुषगुणकारितक्रियात्वात् वस्तेवरचलनवादि...। श्रोत्रैकग्राह्यजातिमात्रत्व
त्राद्। अनित्यमहत्तविशेषगुणत्वात् घटरूपवदिति अनित्यत्वसिद्धिः। द्रव्यो
गुणः सत्यैकाश्रयत्वे सति कर्मान्यत्वात् रूपवदिति। अत्र नासिद्धो हेतुः। द्रव्यो नित्यः अपाक
जनित्यमहत्तविशेषगुणत्वात् सलिलपरमाणुरूपवदिति। अन्वयव्यतिरेकिणा सत्प्रति
पक्षइति चेत्। नात्यदूषणस्य वचनीयत्वाभावप्रसंङ्गात्॥ किंचकोयं व्यति
रेकोस्य हेतोः विपक्षेऽभावो न्योन्याभावः॥ अप्रसिद्धत्वप्रसंगात्॥ अन्यश्चेद्विप
क्षव्यावृत्तिः॥ इत्येवं प्रतियोगिनिहतौ स्मर्यमाणेविपक्षोपलंभसतोव्यावृत्तिरिति चेत्॥
अनुपलभ्यमानेतस्मिन्विपक्षेऽपत्ययोयं हेतुर्न स्यात्॥ ततोनुपलभ्यमानेतस्मि
न्विपक्षोपलंभसतोव्यावृत्तिरिति चेत्। समेयत्यादीनांगमकत्वप्रसंगात्॥ अनै

॥१२

१३



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कानिको — प्रसंगात्॥ अनुमितानुमानोच्छेदप्रसंगाच्च॥ नयोर्व्यतिरेकासिद्धेः॥ विपक्षे
हेतुर्वा दोषो दूषणमिदमुभयं॥ तस्मात्सर्वो हेतुरेव॥ शब्दस्य द्रव्यत्वसाधकं प्रमा
णमन्नप्रमाणं॥ निरवयवेंद्रियग्राह्यत्वं साक्षादिंद्रियसंबंधेनप्रतीयमानत्वं व्यर्थ
विशेषणमित्यव्यं॥ सन्निधिः संयोगजादिभेदात्॥ शब्दत्वं संयोगासमवायिका
रणमिति शब्दजातित्वात्सत्तावदिति संयोगज शब्दसिद्धेः॥ शब्दत्वं विभागासमवा
यिकारणमिति शब्दजातित्वात्सत्तावदिति विभागजसिद्धेः॥ शब्दत्वं गुणत्वं च
वा नरजातिसामान्यजातीयारभ्यवटेति॥ शब्दजातित्वात्सत्तावदिति शब्दज शब्दसि
द्धिः॥ इति [illegible]प्रयोजनं॥ ॥ एवद्रव्यविभागासमवायिकारणं सजातीयं वर्म॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्तस्य संघाते चारपटवदिति तस्यप्रत्यक्षत्वसिद्धं ॥ घटकर्मअस्मदादिप्रत्यक्षं गुणा
त्वेसतिघटसमवेतत्वात्सत्तावदिति ॥ अस्मदादिप्रत्यक्षंयत्सत्तत् क्षणिकं यथाजल
धरः सत्तश्चामीभावाइतिक्षणद्वितयेस्थिरस्वभावादारभ्यकत्वानुपपत्तिः कर्मणइतिचे
त् । नविकल्पानुपपत्तेः ॥ तथाहि क्षणेभवं क्षणिकः तस्यभावः क्षणिकत्वं ॥ द्वितीयक्षणाद्
र्वैरतिष्ठतीतिक्षणिकः तस्यभाव क्षणिकत्वं ॥ आद्येविकल्पेनसिद्धसाधनं स्थायित्व
क्षेपितत्संभवात् । नद्वितीयः व्यावृत्तावनेकांतिकात् अन्यभावाद्भिन्नाव्यावृत्तिर्ना
स्तीतिचेत् ॥ व्यावृत्तायसत्यांस्वलक्षणानांक्षणिकत्वेनाधिनाभावस्याशक्यग्रह
त्वादनुपगतस्यानुमानस्यासंभवप्रसंगात् ॥ अपसिद्धांतप्रसंगाच्च ॥ तस्मात्सत्तव



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धारणिकत्वेऽप्रमाणं॥ स्थायित्वेतु विप्रतिपन्नस्मर्त्तेकर्मस्थोऽनिक्षणेतरक्षणेसत्त्व
त्वात्संप्रतिपन्नवदिति॥ इतिकर्मपदार्थः॥ ॥विषयानुगतसामान्य॥तत्राप्रमाणंप्रत्यक्षं
अथैतत्कल्पनाज्ञानमिति चेत्॥कल्पनात्वस्यविकल्पानुपपत्तेः॥तथाहि।किंनिर्विषय
त्वंकल्पनात्वं किंवाशब्दसंसृष्टार्थप्रतिभासकत्वं।अद्योस्मिन्स्मरणानंतरभावित्व
मिति॥ नाद्यः॥इदमित्यवाधितविषयत्वात्।नापिद्वितीयः।अर्थेशब्दात्भावेवाच्य
र्थस्यश्रोत्रपरिच्छेद्यत्वंस्यात्॥शब्दस्यवाबाह्येंद्रियसंबंधप्रसंज्यते॥नातीयः।
इंद्रियसंनिकर्षानुविधायिनोबोधस्यस्मरणानंतरभावित्वेपिविरोधाभावात्॥स्म
रणजननानंतरमुपजातस्मरणसंस्कारस्याभ्युपगतप्रामाण्यस्याप्रामा
ण्यप्रसंगाच्च॥सामान्यानभ्युपगमेलिंगलिंगिनोरविनाभावस्यदुर्ज्ञानत्वादनु



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नुमानस्यानुदयप्रसंगात्॥ क्रमक्रमवतामनंतानामुपस...त्कालभावात्॥ अथमतंयद्य
पेवस्तुभूत...मान्यंनास्ति॥तथाप्यतद्व्यावृत्तेः॥सामान्यस्यविद्यमानत्वात्तदुपसंग्रहः
दुष्यनवरतंतदितिचेत्॥ ॥व्यावृत्तेरवस्तुत्वादुपसंग्राह्यत्वाभावात्॥ तस्माद्वस्तु
भूतंसामान्यमंगीकर्तव्यं॥तत्परमपरंच॥ तत्रपरंसत्ताचिद्गतिर्गतत्वात्॥तच्चप्रमाणं॥
कर्मत्वावत्वैयसजातीयं कार्यंसाद्द्रव्यलेयवदिति॥ कार्यगुणः कर्मव्यावृत्तजातिमान्
कार्यत्वानुरागवदितिगुणत्वसिद्धिः॥ कर्मगुणव्यावृत्तजातिमत्कार्यत्वाद्वेवात्वयव
दितिकर्मत्वंसिद्धिः॥ कालगुणव्यावृत्तजातिमान्द्रव्यत्वाद्दोवदितिद्रव्यत्वसिद्धिः॥
विप्रतिपन्नाःपृथिव्यग्नेजोवायवः॥कालव्यावृत्तजातिमंतः स्पर्शवत्वाद्दो
वदिति॥ पृथिवीत्वादितिसिद्धिः॥आत्माद्रव्यत्वावांतरजातिमान्चक्षुर्दृश्यगु





CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवञ्चादृष्टवदिति आत्मत्वसिद्धिः॥ मनोद्रव्यत्वावान्तरजातिमत्त्वं नानासमवायिकारणाश्रयत्वा
त्॥ आत्मवदिति॥ मनस्त्वसिद्धिः॥ कार्यरूपरसादिव्यावृत्तजातिमत्कार्यत्वान्नगोवदिति तत्त्वसि
द्धिः॥ एवंसर्वत्र रसादिष्ववगन्तव्यं॥ रत्नक्षेमणादिषु॥ ॥इतिसामान्यपदार्थः॥ ॥अथ सामान्य
एवैनेवसमवायीविशेषः॥ तत्प्रमाणं॥ मनःमनोन्तरव्यावृत्तनिःसामान्यसमवायिद्रव्यत्वाद्गो
वदिति॥ निसाः आकाशादयोविशेषवंतः॥ निसद्रव्यत्वान्मनोवदिति॥ सनित्यः सत्येकस्मिन्ज
न्यित्वात्॥ सत्तावदिति॥ ॥इतिविशेषपदार्थः॥ ॥निसःसंबंधः समवायः॥ सत्तासं
बंधानवर्त्तते जातित्वाद्गोत्वादिति॥ तत्प्रमाणं॥ समवायोसमवायप्रत्ययहेतुः॥ परमाणुस
बंधत्वात्संयोगवदिति॥ निसःसत्येसत्यसमवेतत्वात्परमाणुवत्॥ विवादमापन्नाःसम
वायप्रत्ययाः समवायप्रत्ययहेतुविषयाः समवायप्रत्ययत्वात्सम्प्रतिपन्न



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

समवाय प्रत्ययनदिति। समवायेकत्वसिद्धिः॥ ॥इति समवायपदार्थः॥ ॥भावनिषेधो भावः॥
सद्वेधा। अन्योन्याभ्रेति॥ प्रध्वंसः॥ उत्तरोद्वेधा॥ विनाशोऽन्यथा चेति। आद्यः प्रागभावः॥ उत्तरोद्वेधा॥ समानाधिकरणनिषेधो व्यधिकरणश्चेति। घटेपटेतरात्यन्ताभावः॥ उत्तरोऽत्यन्ताभावः॥ नात्रप्राप्तेरप्रतिषेधोऽपि धानीय॥ निद्रामरणनिर्वाणयोरकरणात्॥ विषयाणां निर्वाणं हि निद्रा॥ उपनिबंधकादृष्टक्षयात्॥ कलेवरविलयोमरणं॥ निरतिशयात्मविशेषगुणविलयो निर्वाणं॥ अथकथमसच्च॥ द्रव्येप्रतियोगिनिज्ञायमानेकेवलाधिकरणोपलब्धेः एवनिद्रादिरिति॥ नैवंवाच्यधिकल्पानुपपत्तेः॥ द्रव्यस्यप्रतियोगिनोधिज्ञानंकिंसुप्तस्यकिंवायस्यकस्यचित्॥ आद्येधिकल्पेसुप्तःप्रबुद्धःस्यात्॥ नद्वितीयः॥ परनरगतसंविन्नैःपरनरेणात्मस्वेनज्ञातुमशक्यत्वात्॥ परस्ययथाकथंचित्तरज्ञानमस्तीतिचेत्॥ नपरमाणुगुणानांयथाकथंचिदवगतानांनिषेधप्रसंगात्॥ तस्मादभावोगीकर्तव्यः॥ तच्चाप्रमेयमेयमाणे॥ आ



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्मावदाचिद्दोषवद्दोषगुणभ्रन्यः अनित्यदोषगुणवत्त्वात् पार्थिवपरमाणुवदिति। नाय
द्दोव्यभिचारः तस्यापि तथा साधनात्॥ ॥इति तार्किकचक्रचूडामणिविरचितायां प्रमाणम
यांप्रभाव्यांतात्पर्यार्थसमाप्तः॥

KKSU LIBRARY
RAMTEK
44 I 106
M-1504
Dist Nagpur



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=25.06.20 14:45
,TRANSFERRED=2020/06/25 at 14:53:19
,PAGES=33
,TYPE=STD
,NAME=S0003226
,Book Name=M-1504-PRAMANMANJARI
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection